अवीभसत् अवभासत्। ङ भासते। इति दुर्गादासः॥

भास्, स्त्री, (भासते इति। भास+"भ्राजभासर्व्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्।" ३।२।१७७। इति क्विप्।) प्रभा। अस्य शब्दस्य प्रथमान्तरूपं भाः। इत्यमरः।१।४।३४॥ मयूखः। इति मेदिनी। से, ७॥ इच्छा। इति धरणिः॥

भासः, पुं, (भास्यते इति। भास+भावे घञ्।) दीप्तिः। (यथा, महाभारते।८।५८।३१।
"चन्द्रनक्षत्रभासैश्च वदनैश्चारुकुण्डलैः।")
(भासन्ते गावोऽत्र। भास+आधारे घञ्।) गोष्ठम्। (भासते दीप्यते इति। भास्+कर्त्तरि अच्।) कुक्कुटः। गृध्रः। इति विश्वः। स्वनामख्यातपक्षिविशेषः। तत्पर्य्यायः। शकुन्तः २। इति हेमचन्द्रः॥ (यथा, महाभारते।१।१३४।७०।
"कृत्रिमं भासमारोप्य वृक्षाग्रे शिल्पिभिः कृतम्।
अभिज्ञातं कुमाराणां लक्ष्यभूतमुपादिशत्॥"
पर्व्वतभेदः। यथा, महाभारते।१४।४३।४॥
"हिमवान् पारियात्रश्च सह्यो विन्ध्यस्त्रिकूटवान्।
श्वेतो नीलश्च भासश्च कोष्ठवांश्चैव पर्व्वतः॥")
(स्त्रियां ङीप्। प्राधायाः कन्या। यथा, महाभारते।१।६५।४६।
"अनवद्यां मनुं वंशामसुरां मार्गणप्रियाम्।
अनूपां सुभगां भासीमिति प्राधा व्यजायत॥")

भासः, [स्,] क्ली, (भास्+असुन्।) दीप्तिः। इति द्विरूपकोषः॥

भासन्तः, पुं, (भासते इति। भास्+"तॄभूवहिवसिभासीति।" उणा० ३।१२८। इति झच्।) सूर्य्यः। चन्द्रः। इत्युणादिकोषः॥ भासपक्षी॥ इति मेदिनी। ते, १३६॥ नक्षत्रम्। इति हेमचन्द्रः॥

भासन्तः, त्रि, (भासते इति। भास+झच्।) सुन्दराकारः। इति मेदिनी। ते, १३६॥

भासन्ती, स्त्री, (भासन्त। गौरादित्वात् ङीष्।) नक्षत्रम्। इत्युणादिकोषः॥

भासुः, पुं, (भास्+बाहुलकादुन्।) सूर्य्यः। इति त्रिकाण्डशेषः॥

भासुरं, क्ली, (भासते इति। भास्+"भञ्जभासमिदो घुरच्।" ३।२।१६१। इति घुरच्।) कुष्ठौषधम्। इति जटाधरः॥

भासुरः, पुं, (भास+घुरच्।) स्फटिकः। इति त्रिकाण्डशेषः॥ वीरः। इति धरणिः। कर्त्तरि घुरप्रत्ययनिष्पन्नत्वेन दीप्तियुक्ते, त्रि॥ (यथा, किरातार्ज्जुनीये।५।५।
"मणिमयूखचयांशुकभासुराः
सुरवधूपरिभुक्तलतागृहाः॥")

भासुरपुष्पा, स्त्री, (भासुराणि पुष्पाण्यस्याः। टाप्।) वृश्चिकाली। इति राजनिर्घण्टः॥

भास्करं, क्ली, (भाः करोतीति। कृ+"दिवाविभानिशाप्रभाभास्करान्तानन्तादीति।" ३।२।२१। इति टः।) सुवर्णम्। इति राजनिर्घण्टः॥

भास्करः, पुं, (भाः करोतीति। कृ+"दिवाविभेति।३।२।२१। इति टः।) सूर्य्यः। (यथा, मनौ।२।४८।
"प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम्।
प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि॥")
अग्निः। इति मेदिनी। रे, १६९॥ वीरः। इति धरणिः॥ अर्कवृक्षः। इति राजनिर्घण्टः॥ भास्कराचार्य्यः। स च सिद्धान्तशिरोमण्यादिज्योतिर्ग्रन्थकर्त्ता॥

भास्करप्रियः, पुं, (भास्करस्य प्रियः।) पद्मरागमणिः। इति केचित्। चुणि इति भाषा॥

भास्करेष्टा, स्त्री, (भास्करस्य इष्टा।) आदित्यभक्ता। इति राजनिर्घण्टः॥

भास्वरं, क्ली, (भासते इति। भास्+"स्थेशभासपिसकसो वरच्।३।२।१७५। इति वरच्।) कुष्ठौषधम्। इति शब्दचन्द्रिका॥

भास्वरः, पुं, (भासते इति। भास्+"स्थेशभासपिसकसो वरच्।३।२।१७५। इति वरच्।) दिनम्। इति राजनिर्घण्टः॥ सूर्य्यः। इति केचित्। दीप्तियुक्ते, त्रि। इति मुग्धबोधव्याकरणम्॥ (यथा, महाभारते।२।११।११।
"स डौक्षुभं परित्यज्य रूपं विप्रर्षभस्तदा।
स्वं रूपं भास्वरं भूयः प्रतिपेदे महायशाः॥"
सूर्य्यस्यानुचरविशेषः। स च भगवता सूर्य्येण तारकासुरवधसाहाय्यार्थं स्कन्दाय दत्तः। यथा, महाभारते।९।४५।३०।
"सुभ्राजो भास्वरश्चैव यौ तौ सूर्य्यानुयायिनौ।
तौ सूर्य्यः कार्त्तिकेयाय ददौ प्रीतः प्रतापवान्॥")

भास्वान्, [त्] पुं, (भासः सन्त्यस्येति। भास्+"तदस्यास्त्यस्मिन्निति मतुप्।" ५।२।९४। इति मतुप्। मस्य वः।) सूर्य्यः। (यथा, मार्कण्डेयपुराणे।१०१।१६।
"यथा चाराधितो देवा सोऽदित्या कश्यपेन च।
आराधितेन चोक्तं यत् तेन देवेन भास्वता॥")
अर्कवृक्षः। इत्यमरः॥ दीप्तिः। इति हेमचन्द्रः॥ वीरः। इति मेदिनी॥ दीप्तिविशिष्टे, त्रि॥ (यथा, कुमारसम्भवे।१।२।
"यं सर्व्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च
पृथूपदिष्टां दुदुहुर्धरित्रीम्॥"
प्रकाशकः। यथा, मनौ।१।७७।
"वायोरपि विकुर्व्वाणाद्विरोचिष्णु तमोनुदम्।
ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते॥"
"भास्वत् प्रकाशकम्।"इति तट्टीकायां कुल्लूकभट्टः॥)

भिक्ष, ङ लाभार्थलोभोक्तिक्लिशि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-याचने द्विक०-लाभे लोभोक्तौ च सक०-क्लिशि अक०-सेट्।) अर्थो याचनम्। लोभादुक्तिर्लोभोक्तिः। ङ, भिक्षते भूमिं नृपात् पण्डितः। लभत इत्यर्थः। भिक्षते दातारं धनं भिक्षुः। याचत इत्यर्थः। भिक्षते दातारं दीनः। लोभाद्वदतीत्यर्थः। भिक्षते जनः। क्लिश्यतीत्यर्थः। इति दुर्गादासः॥

भिक्षा, स्त्री, (भिक्ष याचनादौ+"गुरोश्च हलः।" ३।३।१०२। इति अः। ततष्टाप्।) लोभयाचनम्। चाख्योया इति मागा इति च भाषा। तत्पर्य्यायः। याच्ञा २ अर्थना ३ अर्द्दना ४। इत्यमरः।३।२।६॥ प्रार्थनम् ५ याचना ६। इति शब्दरत्नावली॥ (तदुक्तम्।
"वाणिज्ये वसते लक्ष्मीस्तदर्द्धं कृषिकर्म्मणि।
तदर्द्धं राजसेवायां भिक्षायां नैव नैव च॥")
सेवा। भृतिः। इति नानार्थे अमरः॥ भिक्षितवस्तु। इति मेदिनी॥ (सा च ग्रासप्रमाणा। ग्रासमात्रा भवेद्भिक्षेति शातातपवचनात्॥ यथा, मनुः।३।९४।
"कृत्वैतद्बलिकर्म्मैवमतिथिं पूर्व्वमाशयेत्।
भिक्षाञ्च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे॥")
उपनीतस्य भिक्षाविधिर्यथा,—
"भिक्षामाहृत्य शिष्टानां गृहेभ्यः प्रयतोऽन्वहम्।
निवेद्य गुरवेऽश्नीयादाचम्य तदनुज्ञया॥
भवत्पूर्व्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः।
भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम्॥
मातरं वा स्वसारं वा मातुर्व्वा भगिनीं निजाम्।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत्॥
सजातीयगृहेष्वेव सार्व्ववर्णिकमेव वा।
भैक्षस्याचरणं प्रोक्तं पतितादिविवर्जितम्॥
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु।
ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्॥
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्जयेत्॥
सर्व्वद्वारि चरेद्भैक्षं पूर्व्वोक्तानामसम्भवे।
नियम्य प्रयतो वाचं दिशस्त्वनवलोकयन्॥
समाहृत्य तु तद्भैक्षं यावदर्थममायया।
भुञ्जीत प्रयतो नित्यं वाग्यतोऽनन्यमानसः॥
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता॥"
इति कूर्म्मपुराणे उपविभागे १२ अध्यायः॥*॥
सायं प्रातर्भिक्षाटनाभावो यथा,—
"कारयित्वा तु कर्म्माणि कारुभ्यश्चान्न वञ्चयेत्।
सायं प्रातर्गृहद्वारान् भिक्षार्थं नावघट्टयेत्॥"
इति तत्रैव १५ अध्यायः॥*॥
सा त्रिविधा यथा,—
"हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः।
दद्यादतिथये नित्यं बुध्येत परमेश्वरम्॥
भिक्षामाहुर्ग्रासमात्रमग्रन्तस्याश्चतुर्गुणम्।
पुष्कलं हन्तकारान्तं तच्चतुर्गुणमुच्यते॥
गोदोहमात्रं कालं वै प्रतीक्ष्येदतिथिः स्वयम्।
अभ्यागतान् यथाशक्ति पूजयेदतिथिं यथा॥
भिक्षां वै भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे।
दद्यादन्नं यथाशक्ति त्वर्थिभ्यो लोभवर्जितः॥
सर्व्वेषामप्यलाभे तु अन्नं गोभ्यो निवेदयेत्॥"
इति तत्रैव १७ अध्यायः॥